## अभ्यासपत्रम्




(१, २, ३ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) स्तवनं तु मानवस्यैव भवेत् ।

आ) पृथुराजः प्रजाहितदक्षः नृपः ।

इ) अकस्मात् आगन्तुना सह मैत्री युक्ता ।

ई) क्षेत्रपतिः मृगं बन्धनात् व्यमुञ्चत् ।

**२. उचितं पर्यायं चित्वा लिखत ।**

अ) शृगालः स्वार्थहेतुना ________ सह मैत्रम् ऐच्छत् । (मृगेण/काकेन)

आ) फलितं मे ________ । (प्रयोजनम्/मनोरथम्)

इ) ________ बीजेभ्यः अङ्कुराः उद्भूताः । (पर्जन्यानन्तरम्/शीतकालानन्तरम्)

ई) प्रजाः अतीव ________ आसन् । (कृशाः/सुदृढाः)

**३. क्रमेण योजयत ।**

अ) १. क्षेत्रे बीजानां वपनम् । **यथा–**
२. भूमेः उर्वरीकरणम् ।
३. जलव्यवस्थापनम् ।
४. नदीमार्गस्य अवरोधनम् ।

| | |
|---|---|
| **उत्तरम्** | १. नदीमार्गस्य अवरोधनम् । |
| | २. जलव्यवस्थापनम् । |
| | ३. भूमेः उर्वरीकरणम् । |
| | ४. क्षेत्रे बीजानां वपनम् । |

आ) १. भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताः च ।
२. पुरोहितेन उपायः कथितः ।
३. तत् दृष्ट्वा राजा चिन्ताकुलः जातः ।
४. एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् ।

इ) १. पुरोहितस्य उपदेशकथनम् ।
२. पृथुभूपस्य धनुःसज्जीकरणम् ।
३. भूमेः कृषिकार्यस्य उपदेशनम् ।
४. भूमेः स्त्रीरूपं धृत्वा प्रकटनम् ।

ई) १. मृगकाकयोः स्नेहेन निवासः ।
२. काकस्य उपदेशः ।
३. मृगकाकशृगालानाम् एकत्र निवासः ।
४. शृगालस्य मृगेण सह मित्रता ।

उ) १. क्षेत्रपतिना पाशयोजनम् ।
२. शृगालेन मृगाय सस्यपूर्णक्षेत्रस्य दर्शनम् ।
३. मृगस्य पाशबन्धनम् ।
४. मृगस्य प्रत्यहं क्षेत्रं गमनम् ।

ऊ) १. मृगः पाशैर्बद्धः ।
२. मृगः सस्यम् अखादत् ।
३. जम्बूकः मनसि आनन्दितः ।
४. क्षेत्रपतिना पाशः योजितः ।

## ४. रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत ।

अ) पुरुषः ________ भिन्द्यात् ________ छिन्द्यात् रासभरोहणं कुर्यात् ।
येन केन ________ (सः) ________ पुरुषः भवेत् ।

आ) ________ आत्मनः ________ बध्यन्ते । तत्र ________ न बध्यन्ते ।
(यतः) ________ सर्वार्थसाधनम् ।

## ५. समासविग्रहं कुरुत ।

चिन्ताकुलः, धनधान्यपुष्पफलानि, चोरलुण्ठकभयम्, प्रजाहितदक्षः, जलव्यवस्थापनम्, विविधबीजानि, क्षुद्रबुद्धिः, मृगशृगालौ, अपरिचितः, क्षेत्रपतिः, लगुडहस्तः, विद्याविहीनः, नीतिनिपुणाः, शुकसारिकाः, भुजगयमिताः, चरणविकलः, क्रियासिद्धिः, सकोपम्, प्रयागक्षेत्रम्

## ६. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

अ) पृथुवैन्यः स्वप्रजाः दृष्ट्वा चिन्ताकुलः जातः यतः ________________ ।
१. तस्य प्रजाजनाः परस्परं वादविवादं कुर्वन्ति । २. तस्य प्रजाजनाः पशुवत् जीवन्ति ।

आ) भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः ________________ ।
१. वेनभूपः दुःशासकः आसीत् । २. भूमिः स्वभावेन कृपणा आसीत् ।

इ) पृथुभूपेन स्वधनुः सज्जीकृतम् यतः ________________ ।
१. सः शत्रुं हन्तुम् इच्छति स्म । २. सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म ।

ई) पृथुभूपस्य प्रजाजनाः सन्तुष्टाः अभवन् यतः ________________ ।
१. ते प्रभूतं धान्यम् अलभन्त । २. ते प्रभूतं सुवर्णम् अलभन्त ।

उ) शृगालः मृगेण सह सख्यम् इच्छति यतः ________________ ।
१. शृगालः मृगमांसं खादितुम् इच्छति । २. शृगालः मृगे स्निह्यति ।

ऊ) जम्बूकः मनसि आनन्दितः यतः ________________ ।
१. मृगः पाशैः बद्धः । २. जम्बूकस्य अन्येन सह मित्रता अभवत् ।

ए) क्षेत्रपतिः मृगं बन्धनात् व्यमुञ्चत् यतः ________________ ।
१. सः 'मृगः मृतः' इति चिन्तितवान् । २. पाशबद्धं मृगं दृष्ट्वा तस्य हृदयं करुणया अद्रवत् ।

### पठत-बोधत

**समस्यापूर्तिः**

विजेतव्या लङ्का चरणतरणीयो जलनिधिर्
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे** ।।

### क्रीडत-नन्दत

**खादामि**

शिक्षकः खाद्यवस्तूनां नामानि क्रमशः वदेत् यथा फलम्, ओदनम्, पायसम् ................ । सः एकैकं नाम यदा वदति तदा क्रीडकाः सर्वेऽपि हस्तम् उत्तोल्य 'खादामि' इति उच्चैः वदेयुः। शिक्षकः मध्ये मध्ये कदाचित् खाद्यवस्तूनां नामानि विहाय अन्यवस्तूनां नाम उच्चारयेत्। यथा ............... उत्पीठिका, पुस्तकम् इत्येवम् । तदा तु क्रीडकः 'खादामि' इति वदति हस्तोत्तोलनं वा करोति तर्हि सः गणात् बाह्यः भवति । **- क्रीडावल्ली-पुस्तकात् ।**